श्रीवेदान्तसारः

Version .9

योगीन्द्रसदानन्दविरचितः
edited
by
Neal Delmonico

September 13, 2001

अखण्डं सच्चिदानन्दम्
अवाङ्मनसगोचरम् ।
आत्मानमखिलाधारम्
आश्रयेऽभिष्टसिद्धये ॥१ ॥

अर्थतोऽप्यद्वयानन्दान्
अतीतद्वैतभानतः ।
गुरूनाराध्य वेदान्त-
सारं वक्ष्ये यथामति ॥२ ॥

वेदान्तो नाम उपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च ॥३ ॥

अस्य वेदान्तप्रकरणत्वात्तदीयैरेवानुबन्धैस्तद्वत्तासिद्धेर्न ते पृथगालोचनीयाः ॥४ ॥

तत्रानुबन्धो नाम अधिकारिविषयसम्बन्धप्रयोजनानि ॥५ ॥

अधिकारी तु विधिवदधीतवेदवेदाङ्गत्वेनापातत अधिगताखिलवेदार्थोऽस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरसरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता ॥६ ॥

काम्यानि स्वर्गादीष्टसाधनानि ज्योतिष्टोमादीनि ॥७ ॥

निषिद्धानि नरकाद्यनिष्टसाधनानि ब्राह्मणहननादीनि ॥८ ॥

नित्यान्यकरणे प्रत्यवायसाधनानि सन्ध्यावन्दनादीनि ॥९ ॥

नैमित्तिकानि पुत्रजन्माद्यनुबन्धीनि जातेष्ट्यादीनि ॥१० ॥

प्रायश्चित्तानि पापक्षयसाधनानि चान्द्रायणादीनि ॥११ ॥

उपासनानि सगुणब्रह्मविषयमानसव्यापाररूपाणि शाण्डिल्यविद्यादीनि ॥१२ ॥

एतेषां नित्यादीनां बुद्धिशुद्धिः परमं प्रयोजनमुपासनानां तु चित्तैकाग्र्यम् ।तमेतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेनेत्यादिश्रुतेः तपसा कल्मषं हन्तीत्यादिस्मृतेश्च ॥१३ ॥

नित्यनैमित्तयोरुपासनानां चावान्तरफलं पितृलोकसत्यलोकप्राप्तिः कर्मणा पितृलोको विद्यया देवलोक इत्यादिश्रुतेः ॥१४ ॥

साधनानि नित्यानित्यवस्तुविवेकेहामुत्रफलभोगविरागशमादिषट्कसम्पत्तिमुमुक्षुत्वानि ॥१५ ॥

नित्यानित्यवस्तुविवेकस्तावद्ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिलमनित्यमितिविवेचनम् ॥ १६ ॥

ऐहिकानां स्रक्चन्दनवनितादिविषयभोगानां कर्मजन्यतयानित्यत्ववदामुष्मिकाणामप्यमृतादिविषयभोगानामनित्यतया तेभ्यो नितरां विरक्तिरिहामुत्रफलभोगविरागः ॥ १७ ॥

शमादयस्तु शमदमोपरतितितिक्षासमाधानश्रद्धाख्याः ॥ १८ ॥

शमस्तावत् श्रवणादिव्यतिरिक्तविषयेभ्यो मनसो निग्रहः ॥ १९ ॥

दमो बाह्येन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यो निवर्तनम् ॥ २० ॥

निवर्तितानामेते तद्व्यतिरिक्तविषयेभ्य उपरमणमुपरतिः । अथवा विहितानां कर्मणां विधिना परित्याग उपरतिः ॥ २१ ॥

तितिक्षा शीतोष्णादिद्वन्द्वसहिष्णुता ॥ २२ ॥

निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः समाधानम् ॥ २३ ॥

गुरुवेदान्तवाक्येषु विश्वासः श्रद्धा ॥ २४ ॥

मुमुक्षुत्वं मोक्षेच्छा ॥ २५ ॥

एवम्भूतः प्रमाताधिकारी । शान्तो दान्त इत्यादिश्रुते । उक्तं चः

प्रशान्तचित्ताय जितेन्द्रियाय
प्रहीणदोषाय यथोक्तकारिणे
गुणान्वितायानुगताय सर्वदा
प्रदेयमेतत् सततं मुमुक्षवे ॥ इति ॥ २६ ॥

विषयो जीवब्रह्मैक्यं शुद्धचैतन्यं प्रमेयम् । तत्रैव वेदान्तानां तात्पर्यात् ॥ २७ ॥

सम्बन्धस्तु तदैक्यप्रमेयस्य तत्प्रतिपादकोपनिषत्प्रमाणस्य च बोध्यबोधकभावः ॥ २८ ॥

प्रयोजनं तु तदैक्यप्रमेयगताज्ञाननिवृत्तिः स्वस्वरूपानन्दावाप्तिश्च । तरति शोकमात्मवितित्यादिश्रुतेः । ब्रह्म वेद ब्रह्मैव भवतीत्यादिश्रुतेश्च ॥ २९ ॥

अयमधिकारी जननमरणादिसंसारानलसन्तप्तो दीप्तशिरा जलराशिमिवोपहारपाणिः श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपसृत्य तमनुसरति ।

तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् ।
समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ॥ इत्यादिश्रुतेः ॥ ३० ॥

स गुरुः परमकृपयाध्यारोपापवादन्यायेन एनमुपदिशति ।

तस्मै स विद्वानुपसन्नाय सम्यक्
प्रशान्तचित्ताय शमान्विताय ।
येनाक्षरं पुरुषं वेद सत्यं
प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् ॥ इत्यादिश्रुतेः ॥ ३१ ॥

असर्पभूतायां रज्जौ सर्पारोपवद्वस्तुन्यवस्त्वारोपोऽध्यारोपाः ॥ ३२ ॥

वस्तु सच्चिदानन्दमद्वयं ब्रह्म । अज्ञानादिसकलजडसमूहोऽवस्तु ॥ ३३ ॥

अज्ञानं तु सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चिदिति वदन्ति । अहमज्ञ इत्याद्यनुभवात्देवात्मशक्तिं स्वगुणैर्निगूढामित्यादिश्रुतेश्च ॥ ३४ ॥

इदमज्ञानं समष्टिव्यष्ट्यभिप्रायेणैकमनेकमिति च व्यवह्रियते ॥ ३५ ॥

तथाहि यथा वृक्षानां समष्ट्यभिप्रायेण वनमित्येकत्वव्यपदेशः, यथा वा जलानां समष्ट्यभिप्रायेण जलाशय इति, तथा नानात्वेन प्रतिभासमानानां जीवगताज्ञानानां समष्ट्यभिप्रायेण तदेकत्वव्यपदेशः । अजामेकामित्यादिश्रुतेः ॥ ३६ ॥

इयं समष्टिरुत्कृष्टोपाधितया विशुद्धसत्त्वप्रधाना ॥ ३७ ॥

एतदुपहितं चैतन्यं सर्वज्ञत्वसर्वेश्वरत्वसर्वनियन्तृत्वादिगुणकमव्यक्तमन्तर्यामी जगत्कारणमीश्वर इति च व्यपदिश्यते सकलाज्ञानावभासकत्वात् । यः सर्वज्ञः सर्वविदितिश्रुतेः ॥ ३८ ॥

ईश्वरस्येयं समष्टिरखिलकारणत्वात्कारणशरीरम्, आनन्दप्रचुरत्वात्कोशवदाच्छादकत्वाच्चानन्दमयकोशः, सर्वोपरमत्वात् सुषुप्तिः, अतएव स्थूलसूक्ष्मप्रपञ्चलयस्थानमिति चोच्यते ॥ ३९ ॥

यथा वनस्य व्यष्ट्यभिप्रायेण वृक्षा इत्यनेकत्वव्यपदेशः, यथा वा जलाशयस्य व्यष्ट्यभिप्रायेण जलानीति, तथाज्ञानस्य व्यष्ट्यभिप्रायेण तदनेकत्वव्यपदेशः । इन्द्रो मायाभिः पुरुरूप ईयत इत्यादिश्रुतेः ॥ ४० ॥

अत्र समस्तव्यस्तव्यापित्वेन समष्टिव्यष्टिताव्यपदेशः ॥ ४१ ॥

इयं व्यष्टिर्निकृष्टोपाधितया मलिनसत्त्वप्रधाना ॥ ४२ ॥

एतदुपहितं चैतन्यमल्पज्ञत्वानीश्वरत्वादिगुणकं प्राज्ञ इत्युच्यते, एकाज्ञानावभासकत्वादस्य प्राज्ञत्वमस्पष्टोपाधितयानतिप्रकाशकत्वम् ॥ ४३ ॥

अस्यापीयमहङ्कारादिकारणत्वात्कारणशरीरम्, आनन्दप्रचूरत्वात्कोशवदाच्छादकत्वाच्चानन्दमयकोशः, सर्वोपरमत्वात् सुषुप्तिः, अतएव स्थूलसूक्ष्मशरीरप्रपञ्चलयस्थानमितिचोच्यते ॥ ४४ ॥

तदानीमेतावीश्वरप्राज्ञौ चैतन्यप्रदीप्ताभिरतिसूक्ष्माभिरज्ञानवृत्तिभिरानन्दमनुभवतः, आनन्दभुक् चेतोमुखः प्राज्ञ इतिश्रुतेः, सुखमहमस्वाप्सम्, न किञ्चिदवेदिषमित्युत्थितस्य परामर्शोपपत्तेश्च ॥ ४५ ॥

अनयोः समष्टिव्यष्ट्योर्वनवृक्षयोरिव जलाशयजलयोरिव वाभेदः ॥ ४६ ॥

एतदुपहितयोरीश्वरप्राज्ञयोरपि वनवृक्षावच्छिन्नाकाशयोरिव जलाशयजलतद्गतप्रतिबिम्बाकाशयोरिव वाभेदः, एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानामित्यादिश्रुतेः ॥ ४७ ॥

वनवृक्षतदवच्छिन्नाकाशयोर्जलाशयजलतद्गतप्रतिबिम्बाकाशयोर्वाधारभूतानुपहिताकाशवदनयोरज्ञानतदुपहितचैतन्ययोराधारभूतं यदनुपहितं चैतन्यं तत्तुरीयमित्युच्यते, शान्तं शिवमद्वैतं चतुर्थं मन्यते स आत्मा स विज्ञेय इत्यादिश्रुतेः ॥ ४८ ॥

इदमेव तुरीयं शुद्धचैतन्यमज्ञानादितदुपहितचैतन्याभ्यां तप्तायःपिण्डवदविविक्तं सन्महावाक्यस्य वाच्यम्, विविक्तं सत्तल्लक्ष्यमित्युच्यते ॥ ४९ ॥

अस्याज्ञानस्यावरणविक्षेपनामकं शक्तिद्वयमस्ति । आवरणशक्तिस्तावदल्पोऽपि मेघोऽनेकयोजनायतमादित्यमण्डलमवलोकयितृनयनपथपिधायकतया यथाच्छादयतीव, तथाज्ञानं परिच्छिन्नमप्यात्मानमपरिच्छिन्नमसंसारिनमवलोकयितृबुद्धिपिधायकतयाच्छादयितीव, तादृशं सामर्थ्यम् । तदुक्तम्:

घनच्छन्नदृष्टिर्घनच्छन्नमर्कं
यथा निष्प्रभं मन्यते चातिमूढः ।
तथा बद्धवज्ञाति यो मूढदृष्टेः
स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ ५० ॥

अनयावृतस्यात्मनः कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वादिसंसारसम्भावनाऽपि भवति, यथा स्वाज्ञानेनावृतायां रज्ज्वां सर्पत्वसम्भावना ॥ ५१ ॥

विक्षेपशक्तिस्तु यथा रज्ज्वज्ञानं स्वावृतरज्जौ स्वशक्त्या सर्पादिकमुद्भावयति, एवमज्ञानमपि स्वावृतात्मनि स्वशक्त्याकाशादिप्रपञ्चमुद्भावयति, तादृशं सामर्थ्यम् । तदुक्तम्: विक्षेपशक्तिर्लिङ्गादिब्रह्माण्डान्तं जगत् सृजेदिति ॥ ५२ ॥

शक्तिद्वयवदज्ञानोपहितं चैतन्यं स्वप्रधानतया निमित्तं, स्वोपाधिप्रधानतयोपादानं च भवति, यथा लूता तन्तुकार्यं प्रति स्वप्रधानतया निमित्तं स्वशरीरप्रधानतयोपादानं च भवति ॥ ५३ ॥

तमःप्रधानविक्षेपशक्तिमदज्ञानोपहितचैतन्यादाकाश आकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी चोत्पद्यते, तस्माद्वैतस्मादात्मन आकाशः सम्भूत इत्यादिश्रुतेः ॥ ५४ ॥

तेषु जाड्याधिक्यदर्शनात्तमःप्राधान्यं तत्कारणस्य । तदानीं सत्त्वरजस्तमांसि कारणगुणप्रक्रमेण तेष्वाकाशादिषूत्पद्यन्ते । इमान्येव सूक्ष्मभूतानि तन्मात्राण्यपञ्चीकृतानि चोच्यन्ते ॥ ५५ ॥

एतेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि चोत्पद्यन्ते ॥ ५६ ॥

सूक्ष्मशरीराणि सप्तदशावयवानि लिङ्गशरीराणि ॥ ५७ ॥

अवयवास्तु ज्ञानेन्द्रियपञ्चकं बुद्धिमनसी कर्मेन्द्रियपञ्चकं वायुपञ्चकं चेति ॥ ५८ ॥

ज्ञानेन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि ॥ ५९ ॥

एतान्याकाशादीनां सात्त्विकांशेभ्यो व्यस्तेभ्यः पृथक्क्रमेणोत्पद्यन्ते ॥ ६० ॥

मनो नाम सकल्पविकल्पात्मिकाऽन्तःकरणवृत्तिः ॥ ६२ ॥

अनयोरेव चित्ताहङ्कारयोरन्तर्भावः ॥ ६३ ॥

अनुसन्धानात्मिकाऽन्तःकरणवृत्तिश्चित्तम् ॥ ६४ ॥

अभिमानात्मिकाऽन्तःकरणवृत्तिरहङ्कारः ॥ ६५ ॥

एते पुनराकाशादिगतसात्त्विकांशेभ्यो मिलितेभ्य उत्पद्यन्ते । एतेषां प्रकाशात्मकत्वात् सात्त्विकांशकार्यत्वम् ॥ ६६ ॥

इयं बुद्धिर्ज्ञानेन्द्रियैः सहिता विज्ञानमयकोशो भवति । अयं कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वाद्यभिमानित्वेनेहलोकपरलोकगामी व्यावहारिको जीव इत्युच्यते ॥ ६७ ॥

मनस्तु ज्ञानेन्द्रियैः सहितं सन्मनोमयकोशो भवति ॥ ६८ ॥

कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थाख्यानि ॥ ६९ ॥

एतानि पुनराकाशादीनां रजोऽंशेभ्यो व्यस्तेभ्यः पृथक् क्रमेणोत्पद्यन्ते ॥ ७० ॥

वायवः प्राणापानव्यानोदानसमानाः ।
प्राणो नाम प्राग्गमनवान् नासाग्रस्थानवर्त्ती ।
अपानो नामावाग्गमनवान् पाय्वादिस्थानवर्त्ती ।
व्यानो नाम विष्वग्गमनवानखिलशरीरवर्त्ती ।
उदानो नाम कण्ठस्थानीय ऊर्द्धगमनवानुत्क्रमणवायुः ।

समानो नाम शरीरमध्यगताशितपीतान्नादिसमीकरणकरः । समीकरणं तु परिपाककरणं रसरुधिरशुक्रपुरीशादिकरणमिति यावत् ॥ ७१ ॥

केचित्तु नागकूर्मकृकरदेवदत्तधनञ्जयाख्याः पञ्चान्ये वायवः सन्तीत्याहुः । तत्र नाग उद्गिरणकरः । कूर्म उन्मीलनकरः । कृकरः क्षुधाकरः । देवदत्तो जृम्भनकरः । धनञ्जयः पोषणकरः । एतेषां प्राणादिष्वन्तर्भावात् प्राणादयः पञ्चैवेति केचित् ॥ ७२ ॥

एतत्प्राणादिपञ्चकमाकाशादिगतरजोऽंशेभ्यो मिलितेभ्य उत्पद्यते ॥ ७३ ॥

इदं प्राणादिपञ्चकं कर्मेन्द्रियैः सहितं सत् प्राणमयकोशो भवति । अस्य क्रियात्मकत्वेन रजोंशकार्यत्वम् ॥ ७४ ॥

एतेषु कोशेषु मध्ये विज्ञानमयो ज्ञानशक्तिमान् कर्तृरूपः । मनोमय इच्छाशक्तिमान् करणरूपः । प्राणमयः क्रियाशक्तिमान् कार्यरूपः । योग्यत्वादेवमेतेषां विभाग इति वर्णयन्ति ॥ ७५ ॥

एतत्कोशत्रयं मिलितं सत् सूक्ष्मशरीरमित्युच्यते ॥ ७६ ॥

अत्राप्यखिलसूक्ष्मशरीरमेकबुद्धिविषयतया वनवज्जलाशयवद्वा समष्टिः, अनेकबुद्धिविषयतया वृक्षवज्जलवद्वा व्यष्टिरपि भवति ॥ ७७ ॥

एतत्समष्ट्युपहितं चैतन्यं सूत्रात्मा हिरण्यगर्भः प्राण इत्युच्यते, सर्वत्रानुस्यातत्वाज्ज्ञानेच्छाक्रियाशक्तिमदपञ्चीकृतपञ्चमहाभूताभिमानित्वाच्च । अस्यैषा समष्टिः स्थूलप्रपञ्चापेक्षया सूक्ष्मत्वात् सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं, जाग्रद्वासनामयत्वात् स्वप्नः, अतएव स्थूलप्रपञ्चलयस्थानमिति चोच्यते ॥ ७८ ॥

एतद्व्यष्ट्युपहितं चैतन्यं तैजसो भवति तेजोमयान्तःकरणोपहितत्वात् ॥ ७९ ॥

अस्यापीयं व्यष्टिः स्थूलशरीरा पेक्षया सूक्ष्मत्वादिति हेतोरेव सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जाग्रद्वासनामयत्वात् स्वप्नः, अतएव स्थूलशरीरलयस्थानमिति चोच्यते ॥ ८० ॥

एतौ सूत्रात्मातैजसौ तदानीं सूक्ष्मभिर्मनोवृत्तिभिः सूक्ष्मविषयाननुभवतः, प्रविविक्तभुक् तैजस इत्यादिश्रुतेः ॥ ८१ ॥

अत्रापि समष्टिव्यष्ट्योस्तदुपहितसूत्रात्मतैजस्योर् च वनवृक्षवत्तदवच्छिन्नाकाशवच्च जलाशयजलवत्तद्गतप्रतिबिम्बाकाशवच्चाभेदः । एव सूक्ष्मशरीरोत्पत्तिः ॥ ८२ ॥

स्थूलभूतानि तु पञ्चीकृतानि । पञ्चीकरणं त्वाकाशादिपञ्चस्वेकैकं द्विधा समं विभज्य तेषु दशसु भागेषु मध्ये प्राथमिकान् पञ्चभागान् प्रत्येकं चतुर्धा समं विभज्य तेषां चतुर्णां भागानां स्वस्वद्वितीयार्धभागं परित्यज्य भागान्तरेषु संयोजनम् । तदुक्तम्ः

द्विधा विधाय चैकैकं
चतुर्धा प्रथमं पुनः ।
स्वस्वेतरद्वितीयांशैर्
योजनात् पञ्च पञ्च ते ॥ इति ॥ ८३ ॥

अस्याप्रामाण्यं नाशङ्कनीयं त्रिवृत्करणशुतेः पञ्चीकरणस्याप्युपलक्षणत्वात् ॥ ८४ ॥

पञ्चानां पञ्चात्मकत्वे समानेऽपि तेषु च वैशेष्यात्तु तद्वादस्तद्वाद इति न्यायेनाकाशादिव्यपदेशः सम्भवति ॥ ८५ ॥

तदानीमाकाशे शब्दाभिव्यज्यते, वायौ शब्दस्पर्शौ, अग्नौ शब्दस्पर्शरूपाणि, जले शब्दस्पर्शरूपरसाः, पृथिव्यां शब्दस्पर्शरूपरसगन्धाश्च ॥ ८६ ॥

एतेभ्यः पञ्चीकृतेभ्यो भूतेभ्यो भूर्भुवःस्वर्महर्जनतपःसत्यमित्येतन्नामकानामुपर्युपरि विद्यमानामतलवितलसुतलरसातलतलातलमहातलपातालनामकानामधोऽधो विद्यमानां लोकानां ब्रह्माण्डस्य तदन्तर्गतचतुर्विधस्थूलशरीराणामन्नपानादीनां चोत्पत्तिर्भवति ॥ ८७ ॥

चतुर्विधस्थूलशरीराणि तु जरायुजाण्डजस्वेदजोद्भिज्जाख्यानि । जरायुजानि जरायुभ्यो जातानि मनुष्यपश्वादीनि । अण्डजान्यण्डेभ्यो जातानि पक्षिपन्नगादीनि । स्वेदजानि स्वेदेभ्यो जातानि युकामशकादीनि । उद्भिज्जानि भूमिमुद्भिद्य जातानि लतावृक्षादीनि ॥ ८८ ॥

अत्रापि चतुर्विधसकलस्थूलशरीरमेकानेकबुद्धिविषयतया वनवज्जलाशयवद्वा समष्टिर् वृक्षवज्जलवद्वा व्यष्टिरपि भवति । एतत्समष्ट्युपहितं चैतन्यं वैश्वानरो विराडिति चोच्यते, सर्वनराभिमानित्वाद्विविधं राजमानत्वाच्च । अस्यैषा समष्टिः स्थूलशरीरमन्नविकारत्वादन्नमयकोशः, स्थूलभोगायतनत्वाच्च स्थूलशरीरं जाग्रदिति चोच्यते ॥ ८९ ॥

एतद्व्यष्ट्युपहितं चैतन्यं विश्व इत्युच्यते सूक्ष्मशरीराभिमानमपरित्यज्य स्थूलशरीरादिप्रविष्टत्वात् । अस्याप्येषा व्यष्टिः स्थूलशरीरमन्नविकारत्वादेव हेतोरन्नमयकोशः स्थूलभोगायतनत्वाज् जाग्रदिति चोच्यते । तदानीमेतौ विश्ववैश्वानरौ दिग्वातार्कवरुणाश्विभिः क्रमान्नियन्त्रितेन श्रोत्रादीन्द्रियपञ्चकेन क्रमात् शब्दस्पर्शरूपरसगन्धानग्नीन्द्रोपेन्द्रयमप्रजापतिभिः क्रमा-

न्नियन्त्रितेन वागादीन्द्रियपञ्चकेन क्रमाद्वचनादानगमनविसर्गानन्दान् चन्द्र-चतुर्मुखशङ्कराच्युतैः क्रमान्नियन्त्रितेन मनोबुद्ध्यहङ्कारचित्ताख्येनान्तरिन्द्रि-यचतुष्केन क्रमात् सङ्कल्पनिश्चयाहङ्कार्यचैत्तान् सर्वानेतान् स्थूलविषयाननु-भवतः, जागरितस्थानो बहिःप्रज्ञ इत्यादिश्रुतेः ॥ ९० ॥

अत्राप्यनयोः स्थूलव्यष्टिसमष्ट्योस्तदुपहितयोर्विश्ववैश्वानरयोश्च वनवृक्ष-वत्तदवच्छिन्नाकाशवच्च जलाशयजलवत्तद्गतप्रतिबिम्बाकाशवच्च वा पूर्ववद-भेदः ॥ ९१ ॥

एवं पञ्चीकृतपञ्चभूतेभ्यः स्थूलप्रपञ्चोत्पत्तिः ॥ ९२ ॥

एतेषां स्थूलसूक्ष्मकारणशरीरप्रपञ्चानामपि समष्टिरेको महान् प्रपञ्चो भ-वति यथाऽवान्तरवनानां समष्टिरेकं महद्वनं भवति यथा वाऽवान्तरजला-शयानां समष्टिरेको महान् जलाशयः । एतदुपहितं विश्ववैश्वानरादीश्व-रपर्यन्तं चैतन्यमप्यवान्तरवनावच्छिन्नाकाशवदवान्तरजलाशयगतप्रतिबि-म्बाकाशवच्चैकम् एव ॥ ९३ ॥

आभ्यां महाप्रपञ्चतदुपहितचैतन्याभ्यां तप्तायःपिण्डवदविविक्तं सदनुप-हितं चैतन्यं सर्वं खल्विदं ब्रह्म इति महावाक्यस्य वाच्यं भवति, विविक्तं सल्लक्ष्यमपि भवति ॥ ९४ ॥

एवं वस्तुन्यवस्तुत्वारोप अध्यारोपः सामान्येन प्रदर्शितः ॥ ९५ ॥

इदानीं प्रत्यगात्मनीदमिदमयमयमारोपयतीति विशेषत उच्यते ॥ ९६ ॥

तत्र चातिप्राकृतस्तु आत्मा वै जायते पुत्र इत्यादिश्रुतेः स्वस्मिनिव स्वपुत्रेऽपि प्रेमदर्शनात् पुत्रे पुष्टे नष्टे चाहमेव पुष्टो नष्टश्चेत्याद्यनुभवाच्च पुत्र आत्मेति वदति ॥ ९७ ॥

चार्वाकस्तु स वैष पुरुष अन्नरसमय इत्यादिश्रुतेः प्रदीप्तगृहात् स्वपुत्रं परित्यज्यापि स्वस्य निर्गमनदर्शनात् स्थूलोऽहं कृशोऽहमित्याद्यनुभवाच्च स्थूलशरीरमात्मेति वदति ॥ ९८ ॥

अपरश्चार्वाक ते ह प्राणाः प्रजापतिं पितरमेत्योचुरित्यादिश्रुतेरिन्द्रि-याणामभावे शरीरचलनाभावात्काणोऽहं वदिरोऽहमित्याद्यनुभवाच्चेन्द्रिया-ण्यात्मेति वदति ॥ ९९ ॥

अन्यस्तु चार्वाक अन्योऽन्तर आत्मा प्राणमय इत्यादिश्रुतेः प्राणाभा-व इन्द्रियादिचलनायोगादहमशनायावानहं पिपासावानित्याद्यनुभवाच्च प्रा-ण आत्मेति वदति ॥ १०० ॥

इतरस्तु चार्वाक अन्योऽन्तर आत्मा मनोमय इत्यादिश्रुतेर्मनसि सु-प्ते प्राणादेरभावादहं सङ्कल्पवानहं विकल्पवानित्याद्यनुभवाच्च मन आत्मेति वदति ॥ १०१ ॥

बौद्धस्त्वन्योऽन्तर आत्मा विज्ञानमय इत्यादिश्रुतेः कर्तुरभावे करणस्य शक्त्यभावादहं कर्ताहं भोक्तेत्याद्यनुभवाच्च बुद्धिरात्मेति वदति ॥ १०२ ॥

प्राभाकरतार्किकौ त्वन्योऽन्तर आत्मानन्दमय इत्यादिश्रुतेः सुषुप्तौ बुद्ध्यादीनामज्ञाने लयदर्शनादहमज्ञोऽहमज्ञानीत्याद्यनुभवाच्[1]चाज्ञानमात्मेति वदतः ॥ १०३ ॥

भाट्टस्तु प्रज्ञानघन एवानन्दमय आत्मेत्यादिश्रुतेः सुषुप्तौ प्रकाशाप्रकाशसद्भावान्मामहं न जानामीत्याद्यनुभवाच्चाज्ञानोपहितं चैतन्यमात्मेति वदति ॥ १०४ ॥

अपरो बौद्ध असदेवेदमग्र आसीदित्यादिश्रुतेः सुषुप्तौ सर्वाभावादहं सुषुप्तौ नासमित्युत्थितस्य स्वाभावपरामर्शविषयानुभवाच्च शून्यमात्मेति वदति ॥ १०५ ॥

एतेषां पुत्रादीनां शून्यपर्यन्तानामनात्मत्वमुच्यते । एतैरतिप्राकृतादिवादिभिरुक्तेषु श्रुतियुक्त्यनुभवाभासेषु पूर्वपूर्वोक्तश्रुतियुक्त्यनुभवाभासानामुत्तरोत्तरश्रुतियुक्त्यनुभवाभासैरात्मत्वबाधदर्शनात् पुत्रादीनामनात्मत्वं स्पष्टमेवेति ॥ १०६ ॥

किञ्च प्रत्यगस्थूलोऽचक्षुरप्राणोऽमना अकर्ता चैतन्यं चिन्मात्रं सदित्यादिप्रबलश्रुतिविरोधादस्य पुत्रादिशून्यपर्यन्तस्य जडस्य चैतन्यभास्यत्वेन घटादिवदनित्यत्वादहं ब्रह्मेतिविद्वदनुभवप्राबल्याच्च तत्तच्छ्रुतियुक्त्यनुभवाभासानां बाधितत्वादपि पुत्रादिशून्यपर्यन्तमखिलमनात्मैव ॥ १०७ ॥

अतस्तत्तद्भासकं नित्यशुद्धबुद्धमुक्तसत्यस्वभावं प्रत्यक्चैतन्यमेवात्मतत्त्वमिति वेदान्तविदनुभवः । एवमध्यारोपः ॥ १०८ ॥

अपवादो नाम रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्ववद्वस्तुविवर्तस्यावस्तुनोऽज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वम् । तदुक्तम्ः

सतत्त्वतोऽन्यथाप्रथा विकार इत्युदाहृतः ।
अतत्त्वतोऽन्यथाप्रथा विवर्त इत्युदाहृतः ॥ १०९ ॥

तथाहि खलूच्यते यथैतद्भोगायतनचतुर्विधसकलस्थूलशरीरजातमेतद्भोग्यरूपान्नपानादिकम् एतदाश्रयभूतभूरादिचतुर्दशभुवनान्येतदाश्रयभूतं ब्रह्माण्डं चैतद्सर्वमेतेषां कारणरूपपञ्चीकृतभूतमात्रं भवति । एतानि शब्दादिविषयसहितानि पञ्चीकृतबूतजातानि सूक्ष्मशरीरजातं चैतत्सर्वमेतेषां

[1]In Hiriyanna's version of the text this is *ahaṃ jñānī*, "I possess knowledge," but in Medhācaitanya's reading it is *aham ajñānī*, "I am without knowledge." Either reading seems appropriate here. Hiriyanna's reading suggests that the Self possesses knowledge, but is not itself knowledge, and Medhacaitanya's reading suggests that the Self can be without knowledge.

कारणरूपमपञ्चीकृतभूतमात्रं भवति । एतानि सत्त्वादिगुणसहितान्यपञ्चीकृतपञ्चभूतान्युत्पत्तिव्युत्क्रमेणैतत्कारणभूताज्ञानोपहितचैतन्यमात्रं भवति । एतदज्ञानमज्ञानोपहितं चैतन्यं चेश्वरादिकमेतदाधारभूतानुपहितचैतन्यरूपं तुरीयं ब्रह्ममात्रं भवति ॥ ११० ॥

आभ्यामध्यारोपापवादाभ्यां तत्त्वम्पदार्थशोधनमपि सिद्धं भवति । तथाह्यज्ञानादिसमष्टिरेतदुपहितं सर्वज्ञत्वादिविशिष्टं चैतन्यम् एतदनुपहितं चैतन्यं चैतत्त्रयंतप्तायःपिण्डवदेकत्वेनावभासमानं तत्पदवाच्यार्थो भवति । एतदुपाध्युपहिताधारभूतमनुपहितं चैतन्यं तत्पदलक्ष्यार्थो भवति ॥ १११ ॥

अज्ञानादिव्यष्टिरेतदुपहितात्पज्ञत्वादिविशिष्टं चैतन्यमेतदनुपहितं चैतन्यं चैतत्त्रयं तप्तायःपिण्डवदेकत्वेनावभासमानं त्वम्पदवाच्यार्थो भवति । एतदुपाध्युपहिताधारभूतमनुपहितं प्रत्यगानन्दरूपं तुरीयं चैतन्यं त्वम्पदलक्ष्यार्थो भवति ॥ ११२ ॥

अथ महावाक्यार्थो वर्ण्यते । इदं तत्त्वमसि वांक्य सम्बन्धत्रयेणाखण्डार्थबोधकं भवति । सम्बन्धत्रयं नाम पदयोः सामानाधिकरण्यं पदार्थयोर्विशेषणविशेष्यभावः प्रत्यगात्मपदार्थयोर्लक्ष्यलक्षणभावश्चेति । तदुक्तम्ः

> सामानाधिकरण्यं च विशेषणविशेष्यता ।
> लक्ष्यलक्षणसम्बन्धः पदार्थप्रत्यगात्मनाम् ॥ ११३ ॥

सामानाधिकरण्य-सम्बन्धस्तावद्यथा सोऽयं देवदत्त इति वाक्ये तत्कालविशिष्टदेवदत्तवाचकसशब्दस्यैतत्कालविशिष्टदेवदत्तवाचकायंशब्दस्य चैकस्मिन् देवदत्तपिण्डे तात्पर्यसम्बन्धः, तथा तत्र तत्त्वमसीति वाक्येऽपि परोक्षत्वादिविशिष्टचैतन्यवाचकतत्पदस्यापरोकत्वादिविशिष्टचैतन्य वाचकत्वम्पदस्य चैकस्मिंश्चैतन्ये तात्पर्यसम्बन्धः ॥ ११४ ॥

विशेषणविशेष्यभावसम्बन्धस्तु यथा तत्रैव वाक्ये सशब्दार्थतत्कालविशिष्टदेवदत्तस्यायंशब्दार्थैतत्कालविशिष्टदेवदत्तस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः, तथात्रापि वाक्ये तत्पदार्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वम्पदार्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः ॥ ११५ ॥

लक्ष्यलक्षणभावसम्बन्धस्तु यथा तत्रैव सशब्दायंशब्दयोस्तदर्थयोर्वा विरुद्धतत्कालैतत्कालविशिष्टत्वपरित्यागेनाविद्धदेवदत्तेन सह लक्ष्यलक्षणभावः, तथात्रापि वाक्ये तत्त्वम्पदयोस्तद्-अर्थयोर्वा विरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टत्वपरित्यागेनाविरुद्धचैतन्येन सह लक्ष्यलक्षणभावः । इयमेव भागलक्षणेत्युच्यते ॥ ११६ ॥

अस्मिन् वाक्ये नीलमुत्पलमिति वाक्यवद्वाक्यार्थो न सङ्गच्छते । तत्र तु नीलपदार्थनीलगुणस्योत्पलपदार्थोत्पलद्रव्यस्य च शौक्ल्यपटादिभेदव्याव-

र्तकतयान्योन्यविशेषणविशेष्यरूपसंसर्गस्यान्यतरविशिष्टस्यान्यतरस्य तदैक्यस्य वा वाक्यार्थत्वाङ्गीकरणे प्रमाणन्तरविरोधाभावात्तद्वाक्यार्थः सङ्गच्छते । अत्र तु तत्पदार्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वम्पदार्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावसंसर्गस्यान्यतरविशिष्टस्यान्यतरस्य तदैक्यस्य वा वाक्यार्थाङ्गीकारे प्रत्यक्षादिप्रमाणविरोधाद्वाक्यार्थो न सङ्गच्छते ॥ ११७ ॥ (तदुक्तम्ः

संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र सम्मतः ।
अखण्डैकरसत्वेन वाक्यार्थो विदुषां मतः ॥ इति)[2]

अत्र तु गङ्गायां घोषः प्रतिवसतीति वाक्यवज्जहल्लक्षणापि न सङ्गच्छते । तत्र तु गङ्गाघोषयोराधाराधेयभावलक्षणस्य वाक्यार्थस्याशेषतो विरुद्धत्वाद् वाक्यार्थमशेषतः परित्यज्य तत्सम्बन्धितीरलक्षणाया युक्तत्वाज्जहल्लक्षणा सङ्गच्छते । अत्र तु परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वरूपस्य वाक्यार्थस्य भागमात्रे विरोधाद् भागान्तरमपि परित्यज्यान्य लक्षणाया अयुक्तत्वाज्जहल्लक्षणा न सङ्गच्छते ॥ ११८ ॥

न च गङ्गापदं स्वार्थपरित्यागेन तीरपदार्थं यथा लक्षयति तथा तत् पदं त्वम्पदं वा स्वार्थपरित्यागेन त्वम्पदार्थं तत्पदार्थं वा लक्षयत्वतः कुतो जहल्लक्षषा न सङ्गच्छत इति वाच्यम् । तत्र तीरपदाश्रवणेन तदर्थाप्रतीतौ लक्षणया तत्प्रतीत्यपेक्षायामपि तत्त्वम्पदयोः श्रूयमाणत्वेन तदर्थप्रतीतौ लक्षणया पुनरन्यतरपदेनान्यतरपदार्थप्रतीत्यपेक्षाभावात् ॥ ११९ ॥

अत्र शोणो धावतीतिवाक्यवदजहल्लक्षणापि न सङ्गच्छते । तत्र शोणगुणगमनलक्षणस्य वाक्यार्थस्य विरुद्धत्वात्तदपरित्यागेन तदाश्रयाश्वादिलक्षणया तद्विरोधपरिहारसम्भवादजहल्लक्षणा सम्भवति । अत्र तु परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वस्य वाक्यार्थस्य विरुद्धत्वात्तदपरित्यागेन तत्सम्बन्धिनो यस्य कस्यचिदर्थस्य लक्षितत्वेऽपि तद्विरोधपरिहारासम्भवादजहल्लक्षणापि न सम्भवत्येव ॥ १२० ॥

न च तत्पदं त्वम्पदं वा स्वार्थविरुद्धांशपरित्यागेनांशान्तरसहितं त्वम्पदार्थं तत्पदार्थं वा लक्षयतु, अतः कथं प्रकारान्तरेण भागलक्षणाङ्गीकरणमिति वाच्यम् । एकेन पदेन स्वार्थांशपदार्थान्तरोभयलक्षणाया असम्भवात्पदान्तरेण तदर्थप्रतीतौ लक्षणया पुनस्तत्प्रतीत्यपेक्षाभावाच् च ॥ १२१ ॥

तस्माद् यथा सोऽयं देवदत्त इति वाक्यं तदर्थो वा तत्कालैतत्कालविशिष्टदेवदत्तलक्षणस्य वाक्यार्थस्यांशे विरोधाद् विरुद्धतत्कालैतत्कालविशिष्टत्वांशं परित्यज्याविरुद्धदेवदत्तांशमात्रं लक्षयति, तथा तत्त्वमसीति वाक्यं

[2]This verse is not found in Medhācaitanya's edition, but is in the other editions.

तदर्थो वा परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्य वाक्यार्थस्यांशे विरोधाद् विरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टत्वांशं परित्यज्याविरुद्धमखण्डचैतन्यमात्रं लक्षयति ॥ १२२ ॥

अथाधुनाहं ब्रह्मास्मीत्यनुभववाक्यार्थो वर्ण्यते । एवमाचार्येणाध्यारोपापवादपुरःसरं तत्त्वम्पदार्थौ शोधयित्वा वाक्येनाखण्डार्थेऽवबोधितेऽधिकारिणोऽहं नित्यशुद्धबुद्धमुक्तसत्यस्वभावपरमानन्दानन्ताद्वयं ब्रह्मास्मीत्यखण्डाकाराकारिता चित्तवृत्तिरुदेति ॥ १२३ ॥

सा तु चित्प्रतिबिम्बसहिता सती प्रत्यगभिन्नमज्ञातं परं ब्रह्म विषयीकृत्य तद्गताज्ञानमेव बाधते । तदा पटकारणतन्तुदाहे पटदाहवदखिलकार्यकारणेऽज्ञाने बाधिते सति तत्कार्यस्याखिलस्य बाधितत्वात्तदन्तर्भूताखण्डाकाराकारिता चित्तवृत्तिरपि बाधिता भवति ॥ १२४ ॥

तत्र वृत्तौ प्रतिबिम्बितं चैतन्यमपि यथा दीपप्रभादित्यप्रभावभासनासमर्था सती तयाभिभूता भवति, तथा स्वयम्प्रकाशमानप्रत्यगभिन्नपरब्रह्मावभासनानर्हतया तेनाभिभूतं सत् स्वोपाधिभूताखण्डवृत्तेर्बाधितत्वाद्दर्पणाभावे मुखप्रतिबिम्बस्य मुखमात्रत्ववत् प्रत्यगभिन्नपरब्रह्ममात्रं भवति ॥ १२५ ॥

एवं च सति मनसैवानुद्रष्टव्यं यन् मनसा न मनुत इत्यनयोः श्रुत्योरविरोधो वृत्तिव्याप्यत्वाङ्गीकारेण फलव्याप्यत्वप्रतिषेधप्रतिपादनात् । तदुक्तम्ः

फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितम् ।
ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता ॥ इति
स्वयम्प्रकाशमानत्वान् नाभास उपयुज्यते च ॥ इति च ॥१२६ ॥

जडपदार्थाकाराकारितचित्तवृत्तेर्विशेषोऽस्ति । तथ् हि अयं घट इति घटाकाराकारितचित्तवृत्तिरज्ञातं घटं विषयीकृत्य तद्गताज्ञाननिरसनपुरःसरं स्वगतचिदाभासेन जडं घटमपि भासयति । तदुक्तम्ः

बुद्धितत्स्थचिदाभासौ द्वावपि व्याप्नुतो घटम् ।
तत्राज्ञानं धिया नश्येदाभासेन घटः स्फुरेत् ॥ इति ॥

यथा प्रदीपप्रभामण्डलमन्धकारगतं घटपटादिकं विषयीकृत्य तद्गतान्धकारनिरसनपुरःसरं स्वप्रभया तदपि भासयतीति ॥ १२७ ॥

एवभूतस्वस्वरूपचैतन्यसाक्षात्कारपर्यन्तं श्रवणमनननिदिध्यासनसमाध्यनुष्ठानस्यापेक्षितत्वात् तेऽपि प्रदर्श्यन्ते ॥ १२८ ॥

श्रवणं नाम षड्विधलिङ्गैरशेषवेदान्तानामद्वितीयवस्तुनि तात्पर्यावधारणम् । लिङ्गानि तूपक्रमोपसंहाराभ्यासापूर्वताफलार्थवादोपपत्त्याख्यानि । तदुक्तम्: [3]

उपक्रमोपसम्हाराभ्यासोऽपूर्वता फलम् ।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ॥१२९ ॥

तत्र प्रकरणप्रतिपाद्यस्यार्थस्य तदाद्यन्तयोरुपपादनमुपक्रमोपसंहारौ, यथा छान्दोग्ये षठे प्रपाठके प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुन एकमेवाद्वितीयमित्यादावैतदात्म्यमिदं सर्वमित्यन्ते च प्रतिपादनम् । प्रकरणप्रतिपाद्यस्य वस्तुनस्तन्मध्ये पौनःपुन्येन प्रतिपादनमभ्यासः, यथा तत्रैवाद्वितीयवस्तुनो मध्ये तत्त्वमसीति नवकृत्वः प्रतिपादनम् । प्रकरणप्रतिपाद्यस्याद्वित् यवस्तुनः प्रमानान्तराविषयीकरणमपूर्वता , यथा तत्रैवाद्वितीयवस्तुनो मानान्तराविषयीकरणम् । फलं तु प्रकरणप्रतिपाद्यस्यात्मज्ञानस्य तदनुष्ठानस्य वा तत्र तत्र श्रूयमाणं प्रयोजनम्, यथा तत्राचार्यवान् पुरुषो वेद, तस्य तावदेव चिरं यावन् न विमोक्ष्येऽथ सम्पत्स्य इत्यद्वितीयवस्तुज्ञानस्य तत्प्राप्तिः प्रोयोजनं श्रूयते । प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनमर्थवादः, यथा तत्रैव उत तमादेशमप्राक्षः येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमित्यद्वितीयवस्तुप्रशंसनम् । प्रकरणप्रतिपाद्यार्थसाधने तत्र तत्र श्रूयमाणा युक्तिरुपपत्तिः, यथा तत्र सौम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्यादावद्वितीयवस्तुसाधने विकारस्य वाचारम्भणमात्रत्वे युक्तिः श्रूयते ॥ १३० ॥

मननं तु श्रुतस्याद्वितीयवस्तुनो वेदान्तार्थानुगुणयुक्तिभिरनवरतमनुचिन्तनम् ॥१३१ ॥

विजातीयदेहादिप्रत्ययरहिताद्वितीयवस्तुसजातीयप्रत्ययप्रवाहो निदिध्यासनम् ॥१३२ ॥

समाधिर्द्विविधः सविकल्पको निर्विकल्पकश्चेति ॥१३३ ॥

तत्र सविकल्पो नाम ज्ञातृज्ञानादिविकल्पलयानपेक्ष्याद्वितीयवस्तुनि तदाकाराकारितायाश्चित्त-वृत्तेरवस्थानम् । तदा मृन्मयगजादिभानेऽपि मृज्ज्ञानवद्द्वैतभानेऽप्यद्वैतं वस्तु भासते । तदुक्तमभियुक्तैः:

दृशिस्वरूपं गगनोपमं परम्
सकृद्विभातं त्वजमेकमकरम् ।

[3] The following quote is not found in the edition of the text by Hiriyanna. Its inclusion in the commentary of Nṛsiṃha Sarasvatī suggests that it was not originally a part of the text.

अलेपकं सर्वगतं यदद्वयम्
तदेव चाहं सततं विमुक्तमोम् ॥ इति ॥ १३४ ॥[4]

निर्विकल्पकस्तु ज्ञातृज्ञानादिविकल्पलयापेक्षयाद्वितीयवस्तुनि तदाकाराकारितायाश्चित्त-वृत्तेरतितरामेकीभावेनावस्थानम् ॥ १३५ ॥

तदा तु जलाकाराकारितलवणानवभासेन जलमात्रावभासवदद्वितीयवस्त्वाकाराकारितचित्तवृत्त्यनवभासेनाद्वितीयवस्तुमात्रमेवावभासते । ततश्चास्य सुषुप्तेश्चाभेदशङ्का न भवति, उभयत्र वृत्त्यभाने समानेऽपि तत्सद्भावासद्भावमात्रेणानयोर्भेदोपपत्तेः ॥ १३६ ॥

अस्याङ्गानि यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयः ॥ १३७ ॥

तत्राहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः ॥ १३८ ॥

शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः ॥ १३९ ॥

करचरणादिसंस्थानविशेषलक्षणानि पद्मस्वस्तिकादीन्यासनानि ॥ १४० ॥

रेचकपूरककुम्भकलक्षणाः प्राणनिग्रहोपायाः प्राणायामाः ॥ १४१ ॥

इन्द्रियाणां स्वस्वविषयेभ्यः प्रत्याहरणं प्रत्याहारः ॥ १४२ ॥

अद्वितीयवस्तुन्यन्तरिन्द्रियधारणं धारणा ॥ १४३ ॥

तत्राद्वितीयवस्तुनि विच्छिद्य विच्छिद्य अन्तरिन्द्रियवृत्तिप्रवाहो ध्यानम् ॥ १४४ ॥

समाधिस्तूक्तः सविकल्पक एव ॥ १४५ ॥

एवमस्याङ्गिनो निर्विकल्पकस्य लयविक्षेपकषायरसास्वादलक्षणाश्चत्वारो विघ्नाः सम्भवन्ति ॥ १४६ ॥

लयस्तावद् अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेर्निद्रा ॥ १४७ ॥

अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेर् अन्यावलम्बनं विक्षेपः ॥ १४८ ॥

लयविक्षेपाभावेऽपि चित्तवृत्ते रागादिवासनया स्तब्धीभावादखण्डवस्त्वनवलम्बनं कषायः ॥ १४९ ॥

अखण्डवस्त्वनवलम्बनेऽपि चित्तवृत्ते सविकल्पकानन्दास्वादनं रसास्वादः, समाध्यारम्भसमये सविकल्पकानन्दास्वादनं वा ॥ १५० ॥

[4]Another verse of unknown origin is found in Medhacaitanya's edition:

दृशिस्तु शुद्धोऽहमविक्रियात्मको ।
न मेऽस्ति बन्धो न च मे विमोक्षः ॥

अनेन विघ्नचतुष्टयेन विरहितं चित्तं निर्वातदीपवदचलं सदखण्डचैतन्यमात्रमवतिष्ठते यद् तदा निर्विकल्पकः समाधिरित्युच्यते ॥ १५१ ॥

तदुक्तम्ः

लये सम्बोधयेच्चित्तं विक्षिप्तं शमयेत् पुनः ।
सकषायं विजानीयात् शमप्राप्तं न चालयेत् ॥
नास्वादयेद्रसं तत्र निःसङ्गः प्रज्ञया भवेद् इति ॥

यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृतेति च ॥ १५२ ॥

अथ जीवन्मुक्तलक्षणमुच्यते । जीवन्मुक्तो नाम स्वस्वरूपाखण्डशुद्धब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्वस्वरूपाखण्डे ब्रह्मणि साक्षात्कृते सति अज्ञानतत्कार्यसञ्चितकर्मसंशयविपर्ययादीनामपि बाधितत्वादखिलबन्धरहितो ब्रह्मनिष्ठः ।

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावर इत्यादिश्रुते ॥ १५३ ॥

अयं तु व्युत्थानसमये मांसशोणितमुत्रपुरीषादिभाजनेन शरीरेणान्ध्यामान्द्यपटुत्वादिभाजनेनेन्द्रियग्रामेनाशनायापिपासाशोकमोहादिभाजनेनान्तःकरणेन च तत्तत्पूर्वपूर्ववासनया क्रियमाणानि कर्माणि भुज्यमानानि ज्ञानाविरुद्धारद्धफलानि च पश्यनपि बाधितत्वात् परमार्थतो न पश्यति । यथेदमिन्द्रजालमितिज्ञानवान् तदिन्द्रजालं पश्यनपि परमार्थमिदमिति न पश्यति । शचक्षुरचक्षुरिव सकर्णोऽकर्ण इव समनाअमना इव सप्राणोऽप्राण इवेत्यादिश्रुतेः । उक्तं चः

सुषुप्तवज्जाग्रति यो न पश्यति
द्वयं च पश्यन्नपि चाद्वयत्वतः ।
तथा च कुर्वन्नपि निष्क्रियश्च यः
सात्मविन् नान्य इतीह निश्चयः ॥ इति ॥ १५४ ॥

अस्य ज्ञानात् पूर्वं विद्यमानानामेवाहारविहारादीनामनुवृत्तिवच्छुभवासनानामेवानुवृत्तिर्भवति शुभाशुभयोरौदासीन्यं वा । तदुक्तम्ः

बुद्धाद्वैतसतत्त्वस्य यथेष्टाचरणं यदि ।
शुनां तत्त्वदृशाञ्चैव को भेदोऽशुचिभक्षणे ॥ इति ॥

ब्रह्मवित्त्वं तथा मुक्त्वा सात्मज्ञो न चेतर इति च ॥ १५५ ॥

तदानीममानित्वादीनि ज्ञानसाधनान्यद्वेष्टृत्वादयः सद्गुणाश्चालङ्कारवदनुवर्त्तन्ते । तदुक्तम्ः

उत्पन्नात्मावबोधस्य ह्यद्वेष्टृत्वादयो गुणाः ।
अयत्नतो भवन्त्यस्य न तु साधनरूपिणः ॥ इति ॥ १५६ ॥

किं बहुना अयं देहयात्रामात्रार्थमिच्छानिच्छपरेच्छाप्रापितानि सुखदुःखलक्षणान्यारब्धफलान्यनुभवन्नन्तःकरणाभासादीनामवभासकः सन्स्तदवसाने प्रत्यगानन्दपरब्रह्मणि प्राणे लीने सत्यज्ञानतत्कार्यसंस्काराणामपि विनाशात् परमकैवल्यमानन्दैकरसमखिलभेद प्रतिभासरहितमखण्डब्रह्म अवतिष्ठते । न तस्य प्राणा उत्क्रामन्ति, अत्रैव समवलीयन्ते, विमुक्तश्च विमुच्यत इत्यादिश्रुतेः ॥ १५७ ॥